नेहि गिरिजाम् ॥”) पूर्व्वस्य गुणाः । पित्तास्रदाहनाशित्वम् । भग्नजयहितत्वम् । हिमत्वञ्च । इतिराजवल्लभः ॥ शोथघ्नत्वम् । सरत्वञ्च । इति भावप्रकाशः ॥

पङ्ककर्व्वटः, पुं, (पङ्केषु कर्व्वटो मनोहरः ।) जलशुक्तपङ्कम् । यथा,—
“चुलुकी घनजम्बाले दलाढ्ये पङ्ककर्व्वटः” ।
इति त्रिकाण्डशेषः ॥

पङ्ककीरः, पुं, (पङ्कप्रियः कीरः पक्षिविशेषः ।) कीयरिपक्षी । इति त्रिकाण्डशेषः ॥ (कादाखों चा इति भाषा ॥)

पङ्कक्रीड़ः, पुं, (पङ्के पङ्केन वा क्रीड़ति यः । पङ्क + क्रीड़ + अच् ।) शूकरः । इति कश्चित् । कर्द्दमखेलके, त्रि ॥

पङ्कगड़कः, पुं, (पङ्के स्थितो गड़कः ।) मत्स्यविशेषः । पाँकाल इति भाषा । तत्पर्य्यायः । वर्मी २ । इति त्रिकाण्डशेषः ॥

पङ्कगतिः, स्त्री, (पङ्के गतिरस्य ।) पङ्कगड़कमत्स्यः । इति शब्दमाला ॥

पङ्कग्राहः, पुं, (पङ्कस्थितो ग्राहः जलजन्तुभेदः ।) मकरः । इति हारावली ॥

पङ्कजं, क्ली, (पङ्के पङ्कात् वा जायते इति । पङ्क + जन + कर्त्तरि + डः ।) पद्मम् । इति राजनिर्घण्टः ॥ (यथा रघुः । ३ । ८ ।
“ तिरश्चकार भ्रमराभिलीनयोः
सुजातयोः पङ्कजकोषयोः श्रियम्” ॥
अयं हि योगरूढ़शब्दः । यदुक्तम् ।
“रूढ़ा गवादयः प्रोक्ता यौगिकाः पाचकादयः ।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः” ॥)

पङ्कजन्म, [न्] क्ली, (पङ्के जन्म यस्य ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम् । “पुष्करादिभ्यो देशे” । ५ । २ । १३५ । इति इनिः ।) पद्माकरः ।
(यथा, मार्कण्डेये । ७५ । २४ ।
“तस्यर्त्तस्य तु या कान्तिर्जाता पङ्कजिनीसरः” ॥)
पद्मसमूहः । इति रत्नमाला हेमचन्द्रश्च ॥

पङ्कणः, पुं, (पङ्के मांसादिनिमित्तके पापाचारकर्म्मणि कणः कलहो यस्य सः । पृषोदरादित्वात् साधुः ।) पक्कणः । शवरालयः । इति शब्दरत्नावली ॥

पङ्कप्रभा, स्त्री, (पङ्कस्य प्रभा प्रकाशो यस्याम् ।) कर्द्दमयुक्तनरकविशेषः । इति हेमचन्द्रः ॥

पङ्कमण्डूकः, पुं, (पङ्के मण्डूक इव) शम्बूकः । इति हारावली ॥

पङ्करुट्, [ह्] क्ली, (पङ्के रोहतीति । पङ्क + रुह + क्विप् ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्करुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह् + “ इगुपधज्ञाप्रीकिरः कः ” । ३ । १ । १३५ । इति कः ।) पद्मम् । इति राजनिर्घण्टः ॥

पङ्कवासः, पुं, (पङ्के वासो यस्य सः ।) कर्कटः । इति राजनिर्घण्टः ॥ (मत्स्यादयोऽप्यत्र ॥)

पङ्कशुक्तिः, स्त्री, (पङ्के स्थिता या शुक्तिः ।) दुर्नामा । इति हारावली ॥ झिनुक् इति भाषा ॥

पङ्कशूरणः, पुं, (पङ्के शूरण इव ।) शालूकः । इति त्रिकाण्डशेषः ॥

पङ्कारः, पुं, (पङ्कमृच्छति पङ्कं प्राप्य वर्द्धते इति यावत् । पङ्क + ऋ + उपपदे “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) शैवलः । सेतुः । सोपानम् । जलकुब्जकः । इति मेदिनी ॥

पङ्किलः, त्रि, (पङ्कोऽस्त्यस्मिन् । “लोमादिपामादिपिच्छादिभ्यः शनेलचः” । ५ । २ । १०० । इति इलच् ।) सकर्द्दमः । तत्पर्य्यायः । सजम्बालः २ । इत्यमरः । २ । १ । १० ॥ पङ्कयुक्तः ३ । इति शब्दरत्नावली ॥ कर्द्दमान्वितः ४ । इति जटाधरः ॥ (लक्षणया व्याप्तार्थेऽपि । यथा महाभारते ८ पर्व्वणि । “मांसमज्जास्थिपङ्किला मही” ॥)

पङ्केजं, क्ली, (पङ्के जायते इति । “सप्तम्यां जनेर्डः” । ३ । २ । ९७ । इति डः । “तत्पुरुषे कृतीति” । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इति त्रिकाण्डशेषः ॥

पङ्केरुहं, क्ली, (पङ्के रोहतीति । पङ्क + रुह + “इगुपधेति” । ३ । १ । १३५ । इति कः । “ तत्पुरुषे कृति बहुलम् ” । ६ । ३ । १४ । इति सप्तम्या अलुक् ।) पद्मम् । इत्यमरः ॥ १ । १० । ४० ॥ (यथा, भागवते । ७ । १५ । ६८ ।
“यत्पादपङ्केरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून्” ॥) सारसपक्षिणि, पुं ॥

पङ्क्तिः, स्त्री, (पच्यते व्यक्तीक्रियते श्रेणीविशेषेणेति यावत् । पचि + व्यक्तीकरणे + भावे + क्तिन् । इदित्वान्नुम् । यद्वा, पञ्चयति विस्तारयति जातिसंस्थानविशेषमिति । पचि + विस्तारे + कर्त्तरि + क्तिच् ।) सजातीयसंस्थानविशेषः । शारि इति पाँति इति च भाषा । तत्पर्य्यायः । वीथी २ आलिः ३ आवलिः ४ श्रेणी ५ । इत्यमरः । २ । ४ । ४ ॥ वीथिः ६ आली ७ आवली ८ पङ्क्ती ९ श्रेणिः १० । इति भरतः ॥ शरणिः ११ सन्ततिः १२ । इति जटाधरः ॥ विङ्गोली १३ पालिः १४ पाली १५ वीथिका १६ । इति शब्दरत्नावली ॥
(यथा, मार्कण्डेये । ४३ । ३९ ।
‘विलोक्या विशदा येषां,फलपङ्क्तिः सुभीषणा’ ॥)
पञ्चाक्षरपादच्छन्दोविशेषः । तस्य लक्षणं यथा ।
“भ्गौगिति पङ्क्तिः” ॥१॥ उदाहरणं यथा,—
“कृष्णसनाथा तर्णकपङ्क्तिः ।
यामुनकच्छे चारु चचार ” ॥
इति छन्दोमञ्जरी ॥ (पङ्क्तिच्छन्दस उत्पत्तिस्थानं यथा, भागवते । ३ । १२ । ४६ ।
“मज्जायाः पङ्क्तिरुत्पन्ना वृहती प्राणतोऽभवत्” ॥
पञ्चकद्वयं परिमाणमस्य इति । “ पङ्क्तिविंशतित्रिंशदिति” । ५ । १ । ५९ । निपातनात् प्रकृतेः पञ्चन्शब्दस्य टिलोपः तिप्रत्ययश्च ।) दशाक्षरपादच्छन्दः । दशसंख्या । इति मेदिनी ॥ (यथा, रघुः । १२ । ९९ ।
“ तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत् ।
स रावणशिरःपङ्क्तिमज्ञातव्रणवेदनाम्” ॥)
पृथिवी । इति शब्दमाला ॥ गौरवम् । पाकः इति हेमचन्द्रः ॥ * ॥
अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा,—
“न संवसेच्च पतितैर्न चाण्डालैर्न पुक्कशैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥
एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम् ।
याजनाध्यापने योनिस्तथैव सह भोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च ।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणां ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्” ॥*॥
पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा,—
“एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् ।
भस्मना कृतमर्य्यादा न तेषां सङ्करो भवेत् ॥
अग्निना भस्मना चैव षड्भिः पङ्क्तिर्विभिद्यते” ॥
इति कूर्म्मे १५ अध्यायः ॥

पङ्क्तिग्रीवः, पुं, (पङ्क्तिः दशसङ्ख्यिका ग्रीवा यस्य ।) रावणः । इति शब्दरत्नावली ॥

पङ्क्तिचरः, पुं, (पङ्क्त्या श्रेणीबद्धः सन् चरतीति । पङ्क्ति + चर् + टः ।) कुररपक्षी । इति राजनिर्घण्टः ॥

पङ्क्तिदूषकः, पुं, (श्राद्धकाले भोजनार्थमुपविष्टानां व्रतस्नातानां ब्राह्मणानां पङ्क्तिं श्रेणीं दूषयति यः । पङ्क्ति + दूष् + कर्त्तरि ण्वुल् ।) अपाङ्क्तेयः । श्राद्धभोजनानर्हब्राह्मणः । यथा,—
“अपाङ्क्तेयास्तु ये राजन् ! कीर्त्तयिष्यामि तान् शृणु ।
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ॥
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ।
अगारदाही गरदः कुण्डाशी सोमविक्रयी ॥
सामुद्रिको राजदूतस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ।
श्वभिश्च यः परिक्रामेत् यः शुना दष्ट एव च ॥
परिवित्तिस्तु यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः ।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः ।
रक्षांसि गच्छते हव्यं यदेषान्तु प्रदीयते” ॥ * ॥
“श्राद्धे भुक्त्वा महाराज ! दुश्चर्म्मा गुरुतल्पगः ।
श्राद्धं नाश्नयते तस्य पितरोऽपि न भुञ्जते ॥
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप !
भिषजे शोणितसमं नष्टं देवलके तथा ॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ।
वहुवाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ।
ये तु धर्म्मव्यपेतेषु चरित्रापगतेषु च ॥
हव्यं कव्यं प्रयच्छन्ति तेषां तत् परिनश्यति ।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ।